# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ६७

पुरा राम महाबाहो महाबलपराक्रम ।
रूपमासीन्ममाचिन्त्यं त्रिषु लोकेषु विश्रुतम् ।
यथा सोमस्य शक्रस्य सूर्यस्य च यथा वपुः ॥१॥

सोऽहं रूपमिदं कृत्वा लोकवित्रासनं महत् ।
ऋषीन्वनगतान्राम त्रासयामि ततस्ततः ॥२॥

ततः स्थूलशिरा नाम महर्षिः कोपितो मया ।
सञ्चिन्वन्विविधं वन्यं रूपेणानेन धर्षितः ॥३॥

तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ।
एतदेव नृशंसं ते रूपमस्तु विगर्हितम् ॥४॥

स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति ।
अभिशापकृतस्येति तेनेदं भाषितं वचः ॥५॥

यदा छित्त्वा भुजौ रामस्त्वां दहेद्द्विजने वने ।
तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभम् ॥६॥

श्रिया विराजितं पुत्रं दनोस्त्वं विद्धि लक्ष्मण ।
इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे ॥७॥

अहं हि तपसोग्रेण पितामहमतोषयम् ।
दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोऽस्पृशत् ॥८॥

दीर्घमायुर्मया प्राप्तं किं मे शक्रः करिष्यति ।
इत्येवं बुद्धिमास्थाय रणे शक्रमधर्षयम् ॥९॥

तस्य बाहुप्रमुक्तेन वज्रेण शतपर्वणा ।
सक्थिनी च शिरश्चैव शरीरे सम्प्रवेशितम् ॥१०॥

स मया याच्यमानः सन्नानयद्यमसादनम् ।
पितामहवचः सत्यं तदस्त्विति ममाब्रवीत् ॥११॥

अनाहारः कथं शक्तो भग्नसक्थिशिरोमुखः ।
वज्रेणाभिहतः कालं सुदीर्घमपि जीवितुम् ॥१२॥

एवमुक्तस्तु मे शक्रो बाहू योजनमायतौ ।
प्रादादास्यं च मे कुक्षौ तीक्ष्णदंष्ट्रमकल्पयत् ॥१३॥

सोऽहं भुजाभ्यां दीर्घाभ्यां समाकृष्य वनेचरान् ।
सिंहद्विपमृगव्याघ्रान्भक्षयामि समन्ततः ॥१४॥

स तु मामब्रवीदिन्द्रो यदा रामः सलक्ष्मणः ।
छेत्स्यते समरे बाहू तदा स्वर्गं गमिष्यसि ॥१५॥

स त्वं रामोऽसि भद्रं ते नाहमन्येन राघव ।
शक्यो हन्तुं यथातत्त्वमेवमुक्तं महर्षिणा ॥१६॥

अहं हि मतिसाचिव्यं करिष्यामि नरर्षभ ।
मित्रं चैवोपदेक्ष्यामि युवाभ्यां संस्कृतोऽग्निना ॥१७॥

एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः ।
इदं जगाद वचनं लक्ष्मणस्योपशृण्वतः ॥१८॥

रावणेन हृता सीता मम भार्या यशस्विनी ।
निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखम् ॥१९॥

नाममात्रं तु जानामि न रूपं तस्य रक्षसः ।
निवासं वा प्रभावं वा वयं तस्य न विद्महे ॥२०॥

शोकार्तानामनाथानामेवं विपरिधावताम् ।
कारुण्यं सदृशं कर्तुमुपकारे च वर्तताम् ॥२१॥

काष्ठान्यानीय शुष्काणि काले भग्नानि कुञ्जरैः ।
भक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते ॥२२॥

स त्वं सीतां समाचक्ष्व येन वा यत्र वा हृता ।
कुरु कल्याणमत्यर्थं यदि जानासि तत्त्वतः ॥२३॥

एवमुक्तस्तु रामेण वाक्यं दनुरनुत्तमम् ।
प्रोवाच कुशलो वक्तुं वक्तारमपि राघवम् ॥२४॥

दिव्यमस्ति न मे ज्ञानं नाभिजानामि मैथिलीम् ।
यस्तां ज्ञास्यति तं वक्ष्ये दग्धः स्वं रूपमास्थितः ॥२५॥

अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो ।

राक्षसं तं महावीर्यं सीता येन हृता तव ॥ २६ ॥

विज्ञानं हि महद्भ्रष्टं शापदोषेण राघव ।
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ २७ ॥

किं तु यावन्न यात्यस्तं सविता श्रान्तवाहनः ।
तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ २८ ॥

दग्धस्त्वयाहमवटे न्यायेन रघुनन्दन ।
वक्ष्यामि तमहं वीर यस्तं ज्ञास्यति राक्षसं ॥ २९ ॥

तेन सख्यं च कर्तव्यं न्याय्यवृत्तेन राघव ।
कल्पयिष्यति ते प्रीतः साहाय्यं लघुविक्रमः ॥ ३० ॥

न हि तस्यास्त्यविज्ञातं त्रिषु लोकेषु राघव ।
सर्वान्परिसृतो लोकान्पुरा वै कारणान्तरे ॥ ३१ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com